# શ્રીગોપિનાથદેવાષ્ટકમ્

Shri Gopinathadevashtakam

sanskritdocuments.org

March 16, 2019

# Shri Gopinathadevashtakam

# શ્રીગોપિનાથદેવાષ્ટકમ્

## Sanskrit Document Information

Text title : gopinAthadevAShTakam

File name : gopinAthadevAShTakam.itx

Category : vishhnu, krishna, aShTaka, vishvanAthachakravartina, stavAmRRitalaharI

Location : doc_vishhnu

Author : Vishwanatha Chakravarti

Transliterated by : Jan Brzezinski (Jagadananda Das) jankbrz at yahoo.com and Neal Delmonico (Nitai Das) ndelmonico at sbcglobal.net

Proofread by : Jan Brzezinski, Neal Delmonico

Acknowledge-Permission: http://granthamandira.net Gaudiya Grantha Mandira

Latest update : March 16, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

March 16, 2019

*sanskritdocuments.org*

# શ્રીગોપિનાથદેવાષ્ટકમ્

આસ્યે હાસ્યં તત્ર માધ્વીકમસ્મિન્
    વંશી તસ્યાં નાદપીયૂષસિન્ધુઃ ।
તદ્વીચીભિર્મજ્જયન્ ભાતિ ગોપી-
    ર્ગોપીનાથઃ પીનવક્ષા ગતિર્નઃ ॥ ૧॥

શોણોષ્ણીષભ્રાજિમુક્તાસ્રજોદ્યત્
    પિઞ્છોત્તંસસ્પન્દનેનાપિ નૂનમ્ ।
હૃન્નેત્રાલીવૃત્તિરત્નાનિ મુઞ્ચન્
    ગોપીનાથઃ પીનવક્ષા ગતિર્નઃ ॥ ૨॥

બિભ્રદ્વાસઃ પીતમૂરુરુકાન્ત્યા
    શ્લીષ્ટં ભાસ્વત્કિઙ્કિણીકં નિતમ્બે ।
સવ્યાભીરીચુમ્બિતપ્રાન્તબાહુ-
    ર્ગોપીનાથઃ પીનવક્ષા ગતિર્નઃ ॥ ૩॥

ગુઞ્જામુક્તારત્નગાઙ્ગેયહારૈ-
    ર્માલ્યૈઃ કણ્ઠે લમ્બમાનૈઃ ક્રમેણ ।
પીતોદઞ્ચત્કઞ્ચુકેનાઞ્ચિતશ્રી-
    ર્ગોપીનાથઃ પીનવક્ષા ગતિર્નઃ ॥ ૪॥

શ્વતોષ્ણીષઃ શ્વેતસુશ્લોકધૌતઃ
    સુશ્વેતસ્રક્દ્વિત્રશઃ શ્વેતભૂષઃ ।
ચુમ્બન્ શર્યામઙ્ગલારાત્રિકે હૃ-
    દ્ગોપીનાથઃ પીનવક્ષા ગતિર્નઃ ॥ ૫॥

શ્રીવત્સશ્રીકૌસ્તુભોદ્ભિન્નરોમ્ણાં
    વર્ણૈઃ શ્રીમાન્ યશ્ચતુર્ભિઃ સદેષ્ટઃ ।
દૃષ્ટઃ પ્રેમ્ણૈવાતિધન્યૈરનન્યૈ-
    ર્ગોપીનાથઃ પીનવક્ષા ગતિર્નઃ ॥ ૬॥

તાપિઞ્છઃ કિં હેમવલ્લીયુગાન્તઃ
    પાર્શ્વદ્વન્દ્વોદ્દ્યોતિવિદ્યુદ્ઘનઃ કિમ્ ।
કિં વા મધ્યે રાધયોઃ શ્યામલેન્દુ-
    ર્ગોપીનાથઃ પીનવક્ષા ગતિર્નઃ ॥ ૭॥

શ્રીજાહ્નવ્યા મૂર્તિમાન્ પ્રેમપુઞ્જો
    દીનાનાથાન્ દર્શયન્ સ્વં પ્રસીદન્ ।
પુષ્ણન્ દેવાલભ્યફેલાસુધાભિ-
    ર્ગોપીનાથઃ પીનવક્ષા ગતિર્નઃ ॥ ૮॥

ગોપીનાથાષ્ટકં તુષ્ટચેતા-
    સ્તત્પદાબ્જપ્રેમપુષ્ણીભવિષ્ણુઃ ।
યોઽધીતે તન્મન્તુકોટીરપશ્યન્
    ગોપીનાથઃ પીનવક્ષા ગતિર્નઃ ॥ ૯॥

ઇતિ શ્રીવિશ્વનાથચક્રવર્તિઠક્કુરવિરચિતસ્તવામૃતલહર્યાં
        શ્રીગોપિનાથાષ્ટકં સમ્પૂર્ણમ્ ।

*Shri Gopinathadevashtakam*

pdf was typeset on March 16, 2019

Please send corrections to *sanskrit@cheerful.com*